राजिका। इति राजनिर्घण्टः॥ रक्तिकापरिमाणञ्च॥

रक्तेक्षुः, पुं, (रक्तो रक्तवर्ण इक्षुः।) रक्तवर्णेक्षुः। लाल आक् इति भाषा॥ तत्पर्य्यायः। सूक्ष्मपत्रः २ शोणः ३ लोहितः ४ उत्कटः ५ मधुरः ६ इक्ष्वमूलः ७ लोहितेक्षुः ८। अस्य गुणाः। मधुरत्वम्। पाके शीतलत्वम्। मृदुत्वम्। पित्तदाहहरत्वम्। वृष्यत्वम्। तेजोबलविवर्द्धनत्वञ्च। इति राजनिर्घण्टः॥

रक्तैरण्डः, पुं, (रक्तवर्णः एरण्डः।) वृक्षविशेषः। लाल भेरण्डा इति भाषा॥ तत्पर्य्यायः। व्याघ्रः २ हस्तिकर्णः ३ रुवुः ४ उरुवूकः ५ नागकर्णः ६ चञ्चुः ७ उत्तानपत्रकः ८ करपर्णः ९ पाचनः १० स्निग्धः ११ व्याघ्रतलः १२ रक्तकः १३ चित्रवीर्य्यः १४ रुक्तैरण्डः १५। अस्य गुणाः कटुपवनशान्तिरक्तार्त्तिपाण्डुभ्रान्तिश्वासज्वरारोचकनाशित्वम्। लघुत्वञ्च। इति राजनिर्घण्टः॥ तत्पर्य्यायगुणाः।

"शुक्ल एरण्ड आमण्डश्चित्रो गन्धर्व्वहस्तकः।
पञ्चाङ्गुलो वर्द्धमानो दीर्घदण्डो वड़म्बकः॥
रक्तोऽपरो रुवूकः स्यादुरुवूको रुवुस्तथा।
व्याघ्रपुच्छश्च वातारिश्चञ्चुरुत्तानपत्रकः॥
एरण्डयुग्मं मधुरमुष्णं गुरु विनाशयेत्।
शूलशोथकटीवस्तिशिरःपीड़ोदरज्वरान्॥
ब्रध्नश्वासकफानाहकासकुष्ठाममारुतान्॥
एरण्डपत्रं वातघ्नं कफक्रिमिविनाशनम्।
मूत्रकृच्छ्रहरञ्चापि पित्तरक्तप्रकोपणम्॥
वाताग्रदलं गुल्मवस्तिशूलहरं परम्।
कफवातक्रिमीन् हन्ति वृद्धिं सप्तविधामपि॥
एरण्डफलमत्युष्णं गुल्मशूलानिलापहम्।
यकृत्प्लीहोदरार्शोघ्नं कटुकं दीपनं परम्।
तद्वन्मज्जा च विड्भेदी वातश्लेष्मोदरापहः॥"

इति भावप्रकाशः॥

रक्तैर्व्वारुः, पुं, (रक्तः रक्तवर्णः एर्व्वारुः।) इन्द्रवारुणी। इति राजनिर्घण्टः॥ (विशेषोऽस्येन्द्रवारुणीशब्दे विज्ञेयः॥)

रक्तोत्पलं, क्ली, (रक्तं रक्तवर्णमुत्पलम्।) रक्तपद्मम्। तत्पर्य्यायः। रक्तसरोरुहम् २ कोकनदम् ३। इत्यमरः। १। १०। ४२॥ (यथा, बृहत्संहितायाम्। २९। ९।

"बिन्ध्याच सिन्दुवारैण मौक्तिकं कुङ्कुमं कुसुम्भेन।
रक्तोत्पलेन राजा मन्त्री नीलोत्पलेनोक्तः॥"

तथास्य गुणाः।

"धवलं कमलं शीतं मधुरं कफपित्तजित्।
तस्मादल्पगुणं किञ्चिदन्यत् रक्तोत्पलादिकम्॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

रक्तोत्पलः, पुं, (रक्तोत्पलमिव पुष्पमस्यास्य। अर्श आद्यच्।) शाल्मलिवृक्षः। इति राजनिर्घण्टः॥

रक्तोत्पलाभः, पुं, (रक्तोत्पलस्य आभेव आभास्य।) शोणवर्णः। इति जटाधरः। तद्युक्ते, त्रि॥

रक्तोपलं, क्ली, (रक्तमुपलम्।) गैरिकम्। इति हारावली। ११५॥ (गुणादयोऽस्य गैरिकशब्दे ज्ञेयाः॥)

रक्ष, भि पालने। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) भि, रक्षितोऽस्ति। इति दुर्गादासः॥

रक्षः, [स्] क्ली, (रक्षन्त्यस्मादिति। रक्ष+"सर्व्वधातुभ्योऽसुन्।" उणा० ४। १८८। इति असुन्।) राक्षसः। इत्यमरः। १। १। ६२॥ तद्विशेषो यथा,—

"दृष्ट्वा तु विकलान् अज्ञाननाथान् रोगिणस्तथा
दया न जायते यस्य स रक्ष इति मे मतिः॥"

इत्याग्नेये यमशर्म्मिलोपाख्याननामाध्यायः॥

रक्षोघ्नौषधं यथा,—

मनुरुवाच।

"रक्षोघ्नानि विषघ्नानि यानि धार्य्याणि भूभुजा।
अगदानि समाचक्ष्व तानि धर्म्मभृतांवर॥

मत्स्य उवाच।

पत्रिका रोहिणी चैव रक्तमाला महौषधी।
तथामलकवन्दारं या च चित्रपटोलिका॥
काकोली क्षीरकाकोली पीलुपर्णी तथैव च।
केशिनी वृश्चिकाली च महानागा शतावरी॥
तथा गरुड़वेगा च स्यात् कुमुदिनी तथा।
स्थले चोत्पलिनी या च महाभूमिलता च या।
उन्मादिनी सोमराजी सर्व्वरत्नानि पार्थिव।
विशेषान्मरकतान्यत्र कीटपक्षविशेषतः॥
जीवजाताश्च मणयः सर्व्वे धार्य्या विशेषतः।
रक्षोघ्नाश्च यशस्याश्च तथा वैतालनाशनाः॥"

इति मात्स्ये १९२ अध्यायः॥

रक्षःसभं, क्ली, (रक्षसां राक्षसानां सभा। क्लीवत्वमभिधानात्।) रक्षःसमूहः। इत्यमरः। ३। ५। २३॥

रक्षकः, त्रि, (रक्षतीति। रक्ष+ण्वुल्।) रक्षाकर्त्ता। यथा,—

"गोरक्षः सहदेवश्च नकुलो हयरक्षकः।
वैराटे कुरुदायादो नराणां मातुलक्रमः॥"

इति पुराणम्॥

रक्षणं, क्ली, (रक्ष+भावे ल्युट्।) रक्षा। यथा,

"इति प्रणयबद्धाभिर्गोपीभिः कृतरक्षणम्।
पाययित्वा स्तनं माता संन्यवेशयदात्मजम्॥"

इति श्रीभागवते १० स्कन्धे ६ अध्यायः॥

रक्षणारकः, पुं, मूत्रकृच्छ्ररोगः। इति शब्दरत्नावली॥ क्वचित् पुस्तके रक्षणीरकोऽपि पाठः॥

रक्षणिः, स्त्री, त्रायमाणा लता। इति राजनिर्घण्टः॥

रक्षा, स्त्री, (रक्षणमिति। रक्ष+"गुरोश्च हलः।" ३। ३। १०३। इति अः। स्त्रियां टाप्।) रक्षणम्। (यथा, कुमारे। २। २८।

"मयि सृष्टिर्हि लोकानां रक्षा युष्मास्ववस्थिता॥")

जतु। इति मेदिनी। षे, २३॥ भस्म। इति शब्दरत्नावली॥ यशोदाकृता रक्षा यथा,—

"रक्षां विदधिरे सम्यक् गोपुच्छभ्रमणादिभिः।
गोमूत्रेण स्नापयित्वा पुनर्गोरजसार्भकम्॥
रक्षां च चक्रुः शकृता द्वादशाङ्गेषु नामभिः।
गोप्यः संस्पृष्टसलिला अङ्गेषु करयोः पृथक्॥
न्यस्यात्मन्यथ बालस्य बीजन्यासमकुर्व्वत॥
अव्यादजोऽङ्घ्रिमणिमांस्तव जान्वथोरू
यज्ञोऽच्युतः कटितटं जठरं हयास्यः।
हृत् केशवस्त्वदुर ईश इनस्तु कण्ठं
विष्णुर्भुजं मुखमुरुक्रम ईश्वरः कम्॥
चक्र्यग्रतः सहगदो हरिरस्तु पश्चात्
त्वत्पार्श्वयोर्धनुरसी मधुहा जनश्च।
कोणेषु शङ्ख उरुगाय उपर्य्युपेन्द्र-
स्तार्क्ष्यः क्षितौ हलधरः पुरुषः समन्तात्॥
इन्द्रियाणि हृषीकेशः प्राणान् नारायणोऽवतु।
श्वेतद्वीपपतिश्चित्तं मनो योगेश्वरोऽवतु॥
पृश्निगर्भस्तु ते बुद्धिमात्मानं भगवान् परः।
क्रीड़न्तं पातु गोविन्दः शयानं पातु माधवः॥
व्रजन्तमव्याद्वैकुण्ठ आसीनं त्वां श्रियः पतिः।
भुञ्जानं यज्ञभुक् पातु सर्व्वग्रहभयङ्करः॥
डाकिन्यो यातुधान्यश्च कुष्माण्डा येऽर्भकग्रहाः।
भूतप्रेतपिशाचाश्च यक्षरक्षोविनायकाः॥
कोटरा रेवती ज्येष्ठा पूतना मातृकादयः।
उन्मादा ये ह्यपस्मारा देहप्राणेन्द्रियद्रुहः॥
स्वप्नदृष्टमहोत्पाता वृद्धबालग्रहाश्च ये।
सर्व्वे नश्यन्तु ते विष्णोर्नामग्रहणभीरवः॥"

इति श्रीभागवते १० स्कन्धे ६ अध्यायः॥ *॥

अथ पौर्णमास्यां रक्षाबन्धनम्। राखीबाँधा इति भाषा। यथा,—

"पौर्णमास्यां हरे रक्षाबन्धनं विधिपूर्व्वकम्।
व्रजराजकुमारत्वात् केचिदिच्छन्ति साधवः॥"

तत्र भद्रादिसद्भावे तामतिक्रम्यैव कुर्य्यात्। तथा च स्मृत्यन्तरे।

"भद्रायां द्वे न कर्त्तव्ये श्रावणी फाल्गुनी तथा।
श्रावणी नृपतिं हन्ति ग्रामान् दहति फाल्गुनीति॥"

विधिश्च भविष्योत्तरे।

"उपाकर्म्मदिने प्रोक्तमृषीणाञ्चैव तर्पणम्।
ततोऽपराह्णसमये रक्षापोटलिकां शुभाम्॥
कारयेदक्षतैः शस्तैः सिद्धार्थैर्हेमभूषिताम्।
वस्त्रैर्व्विचित्रैः कार्पासैः क्षौमैर्व्वा मलवर्ज्जितैः।
विचित्रं ग्रथितं सूत्रं स्थापयेद्भाजनोपरि॥
उपलिप्तगृहमध्ये दत्तचतुष्के न्यसेच्छुभं पीठम्।
तत्रोपविशेद्राजा सामात्यः सपुरोहितः ससुहृत्॥
ततस्तु पुरोधा नृपते रक्षां बध्नीत मन्त्रेण।
येन बद्धो बली राजा दानवेन्द्रो महाबलः।
तेन त्वां प्रतिबध्नामि रक्षे मा चल मा चल॥"

वैदिकश्च। यदा बध्न दाक्षायणा हिरण्यः शतानीकाय मनस्यमाना तन्मया बध्नामि शतं शारदाया युष्मान् जरदष्टिर्यथा सम्।

"ब्राह्मणैः क्षत्रियैर्व्वैश्यैः शूद्रैश्चान्यैश्च मानवैः।
कर्त्तव्यो रक्षणाचारो विप्रान् संपूज्य शक्तितः॥
अनेन विधिना यस्तु रक्षिकाबन्धमाचरेत्।